धक्रियायाभानं कारकाणां साध्यक्रियायामेवान्वयोपगमात् कृदन्तस्थले कारकविभक्तिप्रयोगस्य सर्व्वजनीनतया साध्यत्वेन तदुपस्थितावेव कारकान्वयोपपत्तिः। "साध्यस्य साधनाकाङ्क्षेति" "नियतं साधने साध्यं क्रिया नियतसाधनेति" "साध्यत्वेन निमित्तानि क्रिया परमपेक्षते" इति चाभियुक्तोक्तेः। अतएव स्तोकं पाक इत्यादौ द्वितीयान्ततोपपद्यते साध्यक्रियाफलस्य विशेषणेऽपि द्वितीयानुशासनात्। घञाद्युपस्थाप्यक्रियाविशेषणस्य तु विशिष्यलिङ्गतया प्रथमाद्यन्तता "कृदभिहितो भावो द्रव्यवत् प्रकाशत" इति-भाष्योक्तेः। कृदभिहितः कृता बोधितः। भावो भावना धात्वर्थस्वरूपमिति यावत् द्रव्येण तुल्यं प्रकाशते द्रव्यधर्म्मान् लिङ्गसंख्याकारकत्वानि भजते इति यावत्। अत्र द्रव्यत्वं लिङ्गसंख्यान्वयित्वमेव योग्यत्वात् न तु पृथिव्याद्यात्मकत्वं ज्ञानपाकादौ तदभावात्। नापि "वस्तूपलक्षणं यत्र सर्व्वनाम प्रयुज्यते। द्रव्यमित्युच्यते सोऽर्थो भेद्यत्वेन विवक्षितः" इति पारिभाषिकसर्व्वनामपरामर्शयोग्यत्वादिरूपं, साध्यक्रियाया अपि तथात्वेनाविशेषापत्तेः। किन्तु सत्वप्रधानानि नामानीत्येकवाक्यतया सत्वद्रव्ययोः पर्य्यायत्वस्य बहुषु स्थलेषु दर्शनात् सत्वभूतत्वमेव द्रव्यत्वमिति फलितार्थः "क्रिया न युज्यते" इत्यादिना लिङ्गाद्ययोगस्यासत्वलक्षणत्वाभिधानात् तद्योगस्यैव सत्वलक्षणत्वौचित्यादिति तु तत्त्वम्। वैयाकरणादिमते चल इत्यादौ क्रियायां शक्तिः "सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियासु च" काव्यप्र० उक्तेः। "असम्पादयतः कञ्चिज्जातिद्रव्यक्रियागुणैः" माघः। प्रयोगे "तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिप्रहतक्रियाः" कुमा० "प्रतिहतक्रियाः विफलप्रयोगाः" मल्लि० करणे (अनुष्ठाने) "वचसस्तस्य सपदि क्रिया केवलमुत्तरम्" माघः। "यथाक्रमं पुंसवनादिकाः क्रियाः" रघुः। "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" "तद्भूतानां क्रियार्थेन समाम्नायः" जै० सू०। शिक्षायाम् "क्रिया हि वस्तूपहिता प्रसीदति" रघुः "चिकित्सायां "क्रियाः(मोघाः) सर्व्वा गतायुषः" सुश्रु०। कर्म्मणि(स्पन्दे) "क्षितिर्जलं तथा तेजः पवनो मन एव च। परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी" भाषा०। "यदाश्रया क्रिया तमविकुर्व्वती नैवात्मानं लभते" शा०भा०। "क्रियैव कालः इति मते सुतरां नाधिकरणता" ति० त० रघु०। संयोग विभागयोरसमवायिकारणतावच्छेदकतया क्रियात्वजातिसिद्धिः। "क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम्। गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः" भाषा० तेन योग्यवृत्तेस्तस्याः प्रत्यक्षता" धात्वर्थे व्यापारे "तेन तुल्यं क्रिया चेद्वतिः" "क्रियासमभिहारे यङ्" "स्वरितञितः कर्त्रभिप्राये क्रियाफले" पा०। "क्रियया यमभिप्रैति" वार्त्ति० "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्" "कर्त्तृकर्म्मव्यवहितामसाक्षाद्धारयत् क्रियाम्। उपकुर्व्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्" "क्रियाकृतविशेषाणां सिद्धिर्यत्र न विद्यते। दर्शनादनुमानाद्वा तत् प्राप्यमिह कथ्यते"। "निर्द्दिष्टविषयं किञ्चिदुपात्तविषयं तथा। अपेक्षितक्रियञ्चेति त्रिधाऽपादानमिष्यते" "धातूपात्तक्रिये नित्यं कारके कर्त्तृतेष्यते" इति च भर्त्तृहरिः। "क्रियासमभिहारेण विराध्यन्तं क्षमेत कः" माघः। धात्वर्थे फले। "कर्म्मवत् कर्म्मणा तुल्यक्रियः" पा० कर्म्मणा कर्म्मस्थक्रियया तुल्यक्रियः समानाधिकरणक्रियः कर्म्मस्थमात्रस्थक्रियारूपफलक इत्यर्थः। क्रियाविशेषणम्। अत्र च यथा फलस्य विशेषणत्वेऽपि द्वितीया तथा क्रियाविशेषणशब्दे वक्ष्यते। क्रियान्वयिनश्च हरिणा दर्शिता यथा

"संबोधनान्तं कृत्वोऽर्थः कारकं प्रथमोदितः। धातुसम्बन्धाधिकारविहितमसमस्तनञ्। तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम्। संम्बन्धस्याष्टकस्यास्य क्रियैवावधार्य्यताम्"। व्यवहाराङ्गक्रियायाम् उदा० क्रियापादशब्दे वक्ष्यते। श्राद्धे "चतुर्द्दशस्यां क्रियाः कार्य्या अन्यैषान्तु विगर्हिताः" म० त० मरीचिः। "मृते पितरि पुत्रेण क्रिया कार्य्या विधानतः" शु० त० मरीचिः। "सपिण्डसन्ततिर्वापि क्रियार्हा नृप! जायते" तत्रैव विष्णुपु०। "ये सपिण्डीकृताः प्रेता न तेषां च पृथक्क्रिया" ति० त० शा०ता०

**क्रियाकल्प** पु० क्रियायां चिकित्सायां कल्पोविधिः। सुश्रुतोक्ते उत्तरतन्त्रे अष्टादशाध्यायप्रतिपाद्ये क्रियाभेदे। "अथातः क्रियाकल्पं व्याख्यामः" इत्युपक्रमात् तस्योक्तेस्तथात्वम्

**क्रियाकार** पु० क्रियां शिक्षारम्भं करोति कृ—अण् उप०स०। १नवच्छात्रे त्रिका० २कार्य्यकारकमात्रे त्रि० स्त्रियां टाप् सि० कौ०। मुग्ध० मते ङीप् इति भेदः।

**क्रियाद्वेषिन्** त्रि० क्रिया व्यवहाराङ्गसाधनं साक्षिलेख्यादिकं द्वेष्टि द्विष—णिनि ६त०। विवादे पञ्चविधहीनान्तर्गत-हीनप्रतिवादिनि "अन्यवादी क्रियाद्वेषी नोपस्थाता